# Shri Shiva Ashtottarashatanama Stotram

# श्रीशिवाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Shiva Ashtottarashatanama Stotram 3

File name : shivAShTottarashatanAmastotram3.itx

Category : shiva, aShTottarashatanAma, moropant

Location : doc_shiva

Author : Mayurakavi (Moropant)

Transliterated by : Sachin Joshi

Proofread by : Sachin Joshi

Description/comments : See corresponding nAmAvalI

Latest update : February 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 22, 2023

*sanskritdocuments.org*

# श्रीशिवाष्टोत्तरशतनामस्तोत्रम्

ॐ श्रीकण्ठो वरदः शर्व आशुतोष उमापतिः ।
दयानिधिर्महादेवो भवो भवहरो हरः ॥ १॥

मदनारिस्त्रिनयनः शङ्करः सुकविः शिवः ।
विभुः प्रभुर्वृषरथो विवेकी विशदो वशी ॥ २॥

ललाटाक्षः कालकालः शरण्यश्चन्द्रशेखरः ।
पुरारातिः श्रितहितो देवदेवः सदाशिवः ॥ ३॥

शान्त उग्रः समः श्रेष्ठो भूतेशो भव्यविग्रहः ।
परमेशः परानन्दः परिपूर्णः पदप्रदः ॥ ४॥

मधुरो महितः शम्भुर्गिरीशो गिरिशो मृडः ।
अजः पिनाकी प्रवरः प्रबलः प्रमथाधिपः ॥ ५॥

मानदः पञ्चवदनो दशबाहुर्दिगम्बरः ।
शूली कपाली सुमुखो मृगपाणिर्जटाधरः ॥ ६॥

शाश्वतोऽतिमहाः स्वामी गिरिधन्वा गुरूत्तमः ।
रुद्रो जयप्रदो जेता भुजगाभूषणोऽव्ययः ॥ ७॥

पुराणः पुण्डरीकाक्षप्रियः प्रणव उद्भवः ।
कर्पूरगौरः सुतपाः सामतुष्टः प्रजापतिः ॥ ८॥

महाव्रतः सुरमणिः सत्यसन्धो विनायकः ।
अन्धकारातिरजितः सदोदारो निरञ्जनः ॥ ९॥

दीनबन्धुर्दक्षहन्ता विरागो नीललोहितः ।
सेव्यः साक्षी कृती नेता उदासीनः सतां गतिः ॥ १०॥

माता पिता सखा भर्ता सकलाधिनिवारकः ।
बहुरूपो वेदसारो विद्यानाथः शिवायनः ॥ ११॥

निरमित्रो निरवधिर्निरविघ्नो निरामयः ।
मोक्षप्रदमिदं नाम्नां शम्भोरष्टोत्तरं शतम् ॥ १२॥

इति श्रीमयूरकृतेषु संस्कृतकाव्येषु
श्रीशिवाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Sachin Joshi

*Shri Shiva Ashtottarashatanama Stotram*
pdf was typeset on February 22, 2023

Please send corrections to *sanskrit@cheerful.com*